M 2402

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क. M2402 विषय निती शास्त्र

नाव परामर्श खंड

लेखक/लिपीकार —

पृठ 27 काल पूर्ण/~~अपूर्ण~~

M 2402

परार्द्ध खंड

(न्यायान्तर्गत)

१

॥ श्रीगणेशाय नमः ॥ वह्निव्याप्यधूमवान् पर्वत इति परामर्शाद् वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्याद्यनुमितिमामनन्त्याचार्याः। तेषामयमाशयः। तथा
विधपरामर्शात् तादृशानुमितिस्वीकारे गौरवं वह्निव्याप्यालोकवान् पर्वतो धूमवानिति परामर्शाद् वह्निपर्वतो वह्निमानित्यनुमित्युत्पत्त्यापत्तेः हेतुव
वह्निविधेयकानुमितिं प्रति वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकपरामर्शत्वेन हेतुतायां व्यभिचारात्। तद्वारणाय धूमपरामर्शजन्यतावच्छेदक
कोटौ स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वादि देयं येन धूमत्वप्रकारकपरामर्शजन्यत्वमेव लाभमावे मुख्यम्। चिन्तामणिकारमते। आचार्यमते तु तद्रूपपरामर्श
तथाविधानुमित्यनुपगमे वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकवह्निविधेयकानुमितिं प्रति वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यक
परामर्शत्वेन हेतुतायाः कल्पनीयतया वह्निव्याप्यालोकवान् पर्वत इत्यादिपरामर्शात् तथाविधानुमित्युत्पत्त्यभावेन धूमपरामर्शहेतुतायां व्यभि
चाराभावात् धूमपरामर्शजन्यतावच्छेदककोटौ स्वाव्यवहितोत्तरत्वादिविशेषणप्रयोजनाभावात् तत्र तद्दानवैफल्यप्रयुक्तलाघवं विना चिन्तामणिकार
मतापेक्षया दुष्परिहरमेवाचार्यमते वह्निव्याप्यधूमवान् पर्वत इत्यनुमितिपरामर्शस्य किं कार्यतावच्छेदकं तादृग्वह्निव्याप्यधूमप्रकारकपर्वतो द्दे
क वह्निविधेयकानुमितित्वं वह्निव्याप्यधूमवन्महानसं च वह्निव्याप्यालोकवांश्च पर्वत इत्यादिसमूहालम्बनजन्यवह्निव्याप्यधूमवन्महानसं च वह्नि
मत् आलोकवह्निव्याप्यालोकवान् पर्वतो वह्निमांश्चेति समूहालम्बनानुमितौ व्यभिचारात्। न च तत्र वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकनिश्चयत्वप
कारणसत्त्वान्न व्यभिचार इति वाच्यम्। इति व्याप्याद्युपदेऽपि नानुमितित्वेन तत्र वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकनिश्चयत्वेन
हेतुत्वे वह्निव्याप्यधूमवन्महानसं पर्वतो घटवांश्चेति समूहालम्बनादपि वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्यनुमित्यापत्तेस्तथापि य

एम.

नुमितिं प्रति वह्निव्याप्यधूमप्रकारतानिरूपितपर्वतविशेष्यतानिरूपितप्रमात्वेन हेतुतायां आवश्यकतया उपदर्शितसमूहालंबनपरामर्शजन्यसम
तालेवनानुमितेर्व्यभिचारो दुरुद्धर एव वाच्यस्तु वह्निव्याप्यधूमवान्पर्वत इत्याद्युपरामर्शस्य कार्यतावच्छेदके वह्निव्याप्यधूमावच्छिन्नपर्वतत्वावच्छि
न्नविशेष्यतानिरूपितवह्निविधेयतानुमित्यनुमितित्वोऽवच्छेदकविशिष्टसमूहालंबनस्थलेतत्राधेयधूमावच्छिन्नपर्वतत्वावच्छिन्नविशेष्यतानिरूपित
वह्निविधेयताकानुमितेस्तु सत्त्वाभावेनव्यभिचारानवकाशाद् इति तदसत् नीलपर्वतो वह्निव्याप्यधूमाभाववान्पर्वतो वह्निव्याप्यधूमवांश्चेति समूहालं
बनात् तदनुमित्युपपत्तेः [illegible] तथाविधानुमितिं प्रति पर्वतत्वावच्छिन्नधूमवत्त्वावच्छिन्नतत्त्वस्यरूपपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्या
प्यधूमाभावप्रकारताशून्यवह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकज्ञानत्वेन हेतुत्वे नीलपर्वतो वह्निव्याप्यवान्नवेत्याकारकसंशयस्थापि
वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमित्यापत्तेः अस्तु वा तथा उपदर्शितानुमितित्वावच्छिन्नं प्रति तथाविधप्रकारिताशून्यशुद्धपर्वतत्वावच्छि
न्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारताकज्ञानत्वेन हेतुतायां आवश्यकतया वह्निव्याप्यवान्पर्वतो वह्निमानित्यादौ धूमानुमितेर्व्यभिचा
रस्य ओगरूपत्वात् अनुधूमपरामर्शकार्यतावच्छेदकोटौ अपि विशेष्यतायां वह्निव्याप्यधूमानिरूपितत्वं तत्त्वानिवेशितधूमावच्छिन्नत्वनिवेशे च
आनुपपत्तिः सत्पर्वतत्वावच्छिन्नविशेष्यतायां वह्निव्याप्यधूमानिरूपितत्वे वह्निव्याप्यवान्नो वा नाप्यवच्छिन्नत्वाव्यतिरेकेणविशेष्यतानिरूपितवह्नि
विधेयतानुमित्यनुमितेस्तु सत्त्वाभावेन व्यभिचारानवकाशादिति चेन्न वा तथापि पर्वतो वह्निमानिति वह्निव्याप्यधूमपर्वतत्वोभयवैशिष्ट्याव
च्छिन्नव्याप्यधूमवानित्याद्युपरामर्शजन्यवह्निव्याप्यत्वानवगाहि वह्निव्याप्यधूमवान्पर्वतो वह्नि

२

(इदं तु विशेषाधधीकरणव्यता प्रत्येकं कल्पतया एकत्र द्वयमिति विवक्षायां मा व्याप्यत्वमुभयाभावोऽपि द्विर्मितावच्छेदकेऽसंभवादेकत्वाभिप्रायेण परत्वेनाप्युक्तमिति वि
षयता मूलाद्विनिर्गुणस्य भेदाभावधर्मितावच्छेदकं दूषितम्)

इत्थं च यत्र वह्निव्याप्यधूमप्रकारकत्वे ज्ञाने भयप्रकारकत्वं वह्निव्याप्यधूमवान् पर्वत इत्यादौ वह्निव्याप्यधूमवानित्याकारकपरामर्शे आलोकवान् वह्निव्याप्यधूम
वान् इति वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति स्वजन्यमितौ व्याप्तिप्रकारस्य हेतुसंबन्धे तादृशप्रतियोगितावच्छेदकमते यत्र वह्निव्याप्यधूमप्रकारता
निरूपितपर्वतत्वावच्छिन्नधर्मितानवच्छिन्नत्वं तत्र तत्र निरूपितवह्निव्याप्यावच्छिन्नत्वमेव तत्रानुमितित्वावच्छिन्नप्रति शुद्धपर्वतत्वावच्छि
न्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारतानुमितिनिरूप्यत्वेन हेतुत्वं कल्पनानामनुपपत्तिः । न च धूमपरामर्शस्य तथात्वेऽपि धूमत्वेन
तच्छेदकत्वेऽपि वह्निव्याप्यधूमप्रकारतानिरूपिततत्पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारतानिरूपिततत्पर्वतत्वादिनिरूपितवह्निव्याप्यधूमावच्छिन्न
विशेष्यतानिरूपितप्रकारतया धूमपरामर्शजन्यतावच्छेदककोटौ तादृशपरामर्शजन्यत्वस्य तादृगनुमितौ तत्तत्पाविषयविशे
ष्यतायाः सत्वेऽपि तदीयपर्वतविशेष्यतायाः पर्वतत्वावच्छिन्नधर्मितानवच्छिन्नत्वरूपेण वह्निव्याप्यधूमप्रकारतानिरूपिततत्त्वावगाहनेन पर्वतत्वादि ऊप
रूपेण धर्मितावच्छिन्नविशेष्यतात्वरूपेण वह्निव्याप्यधूमप्रकारतानिरूपितत्वविशिष्टविशेष्यताभिन्नतया वह्निव्याप्यधूमप्रकारतानिरूपितपर्वत
त्वावच्छिन्नविशेष्यतानिरूपितविशेष्यतायामन्वयानुमितित्वस्य धूमपरामर्शकार्यतावच्छेदकस्वीकारेणोपपद्यते तदेतानयानुमिति । पर्वतत्वादि
रूपेण धर्मितावच्छिन्नविशेष्यतात्वरूपेण धूमप्रकारतानिरूपितत्वविशिष्टविशेष्यतात्वं च पर्वतत्वादिरूपधर्मितावच्छिन्नविशेष्यतात्वावच्छिन्नं वह्नि रामः
व्याप्यधूमप्रकारतानिरूपकतावच्छेदकपदार्थतानुमितित्वपर्वततत्त्वविशेष्यतासत्त्वे यत्र वह्निव्याप्यधूमप्रकारतानिरूपितायाः अवच्छेदकं न वह्निव्याप्य

धूमावच्छिन्नाविच्छिन्नत्वाख्यं तथात्वमिति तादृशानुमितेः वह्निव्याप्यधूमवान् वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्याकारकापत्तेः किंतु तथाविधनिरूप
कतावच्छेदकपर्वतत्वावच्छिन्नाविच्छिन्नत्वाख्यमिति तथाविधानुमितेर्वह्निव्याप्यपरामर्शे दर्शितधर्मतावच्छेदकाक्रांतत्वमक्षतमेव । एवं चेदृ
शानुमितिहेतुत्वाद्वह्निव्याप्यधूमवत्पर्वतो भवं धर्मितावच्छेदकीभूतवह्निव्याप्यधूमप्रकारताकवह्निव्याप्यधूमवान् पर्वतो वह्निव्याप्यधूमवानित्याका
रकपरामर्शात् उक्तानुमित्यनुपपत्तिः तादृशानुमितावपि न व्यभिचारः । तादृशानुमितौ वह्निव्याप्यधूमस्य तादृशधर्मितावच्छेदकत्वाभावे
नमेव पर्वतत्वस्यातिरिक्ततया वह्निव्याप्यधूमावच्छिन्नविच्छिन्नत्वात्तादृशावच्छिन्नत्वात् वह्निव्याप्यधूमप्रकारतानिरूपकता [illegible] पर्वतविच्छिन्नतायाः स्वीये
पदर्शितधर्मपरामर्शेऽवा [illegible] र्वतावच्छेदकाक्रांतत्वाभावात् । एतेन वह्निव्याप्यालोकवान् पर्वत इत्यादिपरामर्शे नवह्निव्याप्यधूमवद्व्यावृत्त्या
व्यभिचारः स्यादिति तद्बाधस्य दृष्टत्वेन अनुमितावपि वह्निव्याप्यधूमवान् वह्निव्याप्यालोकवान् पर्वतो वह्निमानित्यनुमितावपि व्यभिचारो निरस्तः ॥ ५६
तादृशानुमितेरपि पर्वतत्वातिरिक्तवह्निव्याप्यालोकावच्छिन्नाविच्छिन्नतायाः वह्निव्याप्यधूमप्रकारतानिरूपकपर्वतविच्छिन्नताकत्वेनोप
दर्शितधर्मितावच्छेदकानाक्रान्तत्वादिति । न चैवं तथापि वह्निव्याप्यधूमवान् पर्वत इति परामर्शानन्तरं पीतपर्वतान्योन्याभाववानित्यादि तद्बाध इत्याशङ्क्य
भावे वह्निव्याप्यधूमवान् पीतपर्वतो वह्निमानित्यनुमितेः उपदर्शितधर्मपरामर्शे धर्मितावच्छेदकानाक्रान्तत्वात् पर्वतत्वावच्छिन्नाविच्छिन्नतयैव तादृशानु
मितेरेकत्वमिति ततो वह्निव्याप्यधूमवान् पीतपर्वतो वह्निधर्मितावच्छेदकस्वव्याप्यधूमवान् पीतस्य वह्निव्याप्यधूमधर्मितावच्छेदकत्वाभावात् तत्र पर्वतविच्छि
न्नताकत्वेन वह्निव्याप्यधूमप्रकारकतानिरूपकता । पर्वतत्वावच्छिन्नतया धर्मी यः विच्छिन्नविच्छिन्नतायां वच्छिन्नत्वाभावेनोपदर्शित धर्मपरामर्शा

३

घटितत्वाद्रक्षणसत्त्वाच्छेदितावच्छेदि ॰नु आचार्यमते वह्निव्याप्यधूमवान्पर्वतो वह्नि- निष्ठत्वमिति तो वन्ह्यसंबंधो कालीनत्वसंबंधेन वह्निव्याप्य
धूमस्याभिमानमंगीक्रियते । न च मथासत्तात्तन्निष्ठमिति वं ॰ वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमकालीनवह्निमान् इत्याकारकतावच्छेदि
तान्यां । यत्र संगसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारताभिन्नकालीनत्वसंबंधावच्छिन्ने वह्निव्याप्यधूमप्रकारतातत्रैव तन्निष्ठमिति तत्तथात्वाच्छेद
नमानत् । यत्र तेनसंयोगसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारताभिन्नेव वह्निविशिष्टव्यतानिरूपितकालीनत्वसंबंधावच्छिन्नवह्निव्याप्यधू
मप्रकारतेति उपदर्शितातत्पपत्तिभावात् । तथा च तन्मते पर्वतत्वावच्छिन्नधर्मानवच्छिन्नविशेष्यतानिरूपितसंयोगसंबंधावच्छिन्नवह्निव्या
प्यधूमप्रकारत्वाभिन्नकालीनत्वसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारतानिरूपितवह्निविधेयतानुगत्वमनुमितित्वावच्छिन्नप्रतिबध्ये
पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारताशालिनिश्चयत्वेनानुमितिहेतुत्वकल्पनान्नानुपपत्तिरिति ध्येयम् । वह्निव्या
प्यालोकवान्पर्वत इति परामर्शकाले वह्निव्याप्यधूमवद्न्योन्याभाववानित्याकारकबाधबुद्धौ तद्दशायां वह्निव्याप्यधूमवान्पर्वते वह्नि
व्यालोकवान्पर्वतो वह्निमानित्याधष्ठमितौ च न स्यादिति चोदः । तादृशानुमितौ कालीनत्वसंबंधेन वह्न्यसंभावनाव्याप्यालोकस्य भानात्पुनः गमे
न निरूक्तधूमपरामर्शकार्यतावच्छेदकधर्माभावात् । एवं वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति परामर्शोत्तरं पर्वतोऽन्योन्याभाववानिति बाधस्य
सहकृता तदुत्पत्तिर्न स्यात् । वह्निव्याप्यधूमवान्नीलपर्वतो वह्निमानित्यनुमितेरपि न धूमपरामर्शकार्यतावच्छेदकानाक्रान्तत्वप्रसंगः उपदर्शिततदि रामः
न्नान्तर्गतस्य वह्निव्याप्यधूमधर्मितावच्छेदकस्याभावेन पर्वतत्वातिरिक्तधर्मानवच्छिन्नविशेष्यतानिरूपितसंयोगसंबंधावच्छिन्नवह्निव्या

प्यधर्मप्रकारताभिन्नकालीनत्वसंबंधावच्छिन्नवन्निष्ठव्याप्यधर्मप्रकारतानिरूपितत्वं विधेयतायास्तत्रासत्त्वात्। एवं च त्रयमपि मिलितरीत्या वन्नि-
ष्ठव्याप्यधर्मपर्यवसन्नलोभयधर्मितावच्छेदकीकृत्य वन्निष्ठव्याप्यधर्मप्रकारताकत्वे वन्निष्ठव्याप्यधर्मवत्त्वान्वयितावन्निष्ठव्याप्यधर्मवत्त्वान्न दूषणाकारस्य प्रसामञ्ज-
स्यमानाद्यावन्निष्ठव्याप्यधर्मवत्त्वान्तर्निष्ठव्याप्यधर्मवत्त्वान्वयितावन्निमानि तु तत्त्वानुमितेस्तत्त्वापि न व्यभिचारात्। तेऽनुमितौ वन्निष्ठव्याप्यधर्मप्रकारता-
याः हेतुविधेयतावन्निरूपितकार्यतावच्छेदकत्वान्तर्भावाभावात्। तत्र प्रथमसंयोगसंबंधावच्छिन्नवन्निष्ठव्याप्यधर्मप्रकारतायाः पर्वत-
सामान्यधर्मानवच्छिन्नविधेयतानिरूपितत्वेऽपि समानकालीनत्वसंबंधावच्छिन्नवन्निष्ठव्याप्यधर्मप्रकारताभिन्ना। इतीयं वन्निष्ठव्याप्यधर्म-
प्रकारतायाः कालीनत्वसंबंधावच्छिन्नवन्निष्ठव्याप्यधर्मप्रकारतात्मकत्वेऽपि सा न पर्वतत्वान्यधर्मानवच्छिन्नविधेयतानिरूपितात्तस्याः पर्वत-
त्वादिविशिष्टवन्निष्ठव्याप्यधर्मानवच्छिन्नविधेयतानिरूपितत्वादिति। तत्र शुद्धपर्वतत्वावच्छिन्नविधेयतानिरूपितसंयोगसंबंधावच्छिन्नवन्निष्ठव्या-
प्यधर्मप्रकारताभिन्नकालीनत्वसंबंधावच्छिन्नवन्निष्ठव्याप्यधर्मप्रकारत्वाभावेन निरस्तत्वे धर्मपरामर्शकार्यतावच्छेदकत्वाभावात्। व्यभिचारेण
यत्कार्यतानुगतिरिति तदितिसंदेहात्। तथा सति धर्मकालीनत्वसंबंधेन व्याप्यतिरिक्तस्य ... आचार्यमते अनुमित्युपकारापत्तिः स्यात्। तान्
वन्निष्ठव्याप्यधर्माभाववत्त्वानुपपत्तेरतिरिक्तबाधबुद्धिप्रतिबन्धकत्वात् तथाभिधानानुमितित्वपर्यवसानस्य ... आपत्तिरित्यतो विधायकमितिस्य हीनकालेऽपि आचार्यमते
तादृशानुमितेरवलम्बनत्वादिदूषणापत्तिर्नेत्यत आह इति यावत्। धर्मपरामर्शजन्यानुमितौ वन्निष्ठव्याप्यधर्मादिविषयकत्वानंगीकारे धर्मानुमिति प्रति
धर्मपरामर्शस्य हेतुतायां व्यभिचारवारणाय संबंधेन तत्र तद्विषयकत्वं स्वीये तद्धर्माभावयत्त्वान्वयितत्त्वादिबाधबुद्धिप्रतिबन्धकत्वात् तथाविधानुमितित्वपर्य-
वसानस्याप्यवच्छेदकत्वानुपपत्तेरितिभावः। प्रकृते तु धर्मपरामर्शकार्यतावच्छेदकनिर्वचनेऽव्याप्यपत्तेरुपदर्शितत्वात् तन्नानुमितौ तत्तद्धर्मकालीनत्वसंबं

१०

येनधर्मप्रकारकत्वमनुपेक्ष्यत धर्मिविशिष्टयावज्ज्ञानत्वेन ज्ञानं दत्त्वा यामनुमितिस्वपक्षाद्वेद्यत्वाधनेरसंभवेत्तु त्रितयत्वादिति । नत्वाद्यायामतो यन्निश्चिये य
था नुमितिं प्रतिबन्धमपरामर्शस्य हेतुतायां अन्यलिङ्गकानुमितौ व्यभिचारवारणाय धर्मपरामर्शजन्यानुमितौ धर्मस्य भानमुपेयम
रं व्याप्तिभानाभ्युपगमेन न च नानाज्ञानविषयत्वे एवानुमितौ तन्मते व्याप्तिविषयकत्वमिति वाच्यं अनुमितौ व्याप्तिविषयकत्वानभ्युपगमेऽपि स्वमति
यादेऽनुमितिं प्रति सविकल्पकपरामर्शहेतुतायां व्यभिचारोऽपि न्यासावसरे चिन्तामणिकारोक्तस्वलिङ्गोपधानानुपपत्तेरपि स्त्यादि स्वव्या
प्याभावसमवेतव्यमप्युपरामर्शाद्भिङ्गोपधानाभावात् भावविशेष्याप्यत्वेन तन्मते मत्यादिनोक्तादिति प्रतिबन्धस्यासंगत्यापत्तेरनुमितौ व्याप्तिवि
षयकत्वमप्याचार्यैः स्वीकारस्सिद्धमिति तत्रैव तापत्तेरसंभवादिति चेत् अत्र केचित् व्याप्तेर्नानाविधेयत्वविवक्षाविरहेण नानाविधव्याप्तिविशिष्टहेतु
मत्तानिश्चयानामेवानुमितिं प्रति हेतुत्वस्यानुपपत्तेः । तथा यावद्यावदनुमितौ व्याप्तिभानानां योग्याकारेव नस्पत्वे तावद्भावव्याप्यत्तिस्वरूपव्याप्यस्य
गाहिपरामर्शत्वेन विशिष्टस्याभावव्यवच्छित्तिस्वरूपव्याप्यत्वावगाहिपरामर्शाभावव्याप्यत्वरूपतान्यथैतौ तच्चैमानिस्याकारानुमितिविशिष्टाकारे तेषां परस्पर
व्यभिचारेणावश्यमनुमितिं प्रतिबन्धमपरामर्शहेतुतायां निर्व्यूहमनुपपत्तेतयान्तन्मते तत्तद्व्याप्तिविषयकपरामर्शजन्यानुमितौ तत्तद्व्याप्तिभाना
नीं धारणौपधनिश्चयरूपस्याहुः । तदसत् । एवं नानुमितिं प्रतिसाध्याभावव्याप्यवत्ताभावव्यवच्छित्तित्वरूपव्याप्यवगाहिपरामर्श [illegible] स्य हेतुत्वे केवलान्वयिनि हे
धवं चेत् अतापत्तेः एकैकसंसर्गत्वे तथाहि अनुमितिं प्रतिसाध्याभाववद्वृत्तित्वावगाहिपरामर्शस्य हेतुतामते वृक्षाभावव्यवच्छित्तिधूमवानित्येवं
ते इत्याद्युपरामर्शोत्तरं समवायसंबन्धावच्छिन्नत्वस्य भावव्यवच्छित्तित्वावगाहिपरामर्शात् स्वयोगसंसर्गप्रसङ्गवति धूमवानिति भ्रमानुमितिवारणाय पर्वतौ
द्ववयवान्निश्चियेष कायोगसंसर्गकानुमितिं प्रतिसमवायसंबन्धावच्छिन्नत्वनिश्चयविशिष्टावच्छेदकतानिरूपितसंयोगसंबन्धावच्छिन्नप्रतियोगिता संबन्धा रा१०

हेतुतावच्छेदकाभावव्यक्तित्वस्वरूपव्याप्यत्वगाहिपरामर्शस्यानुमितिहेतुत्वे तत्परिलिंगभेदेन कारणताभेदाभावादनुमितौ व्याप्तिविषयतां परिष्कारद्वा
रा तिगरविच्छिन्नतां गौरवेऽपि प्रमाणाभावेनावश्यकपरामर्शजन्यतावच्छेदकत्वस्य चिंतामणिकारमतेऽप्यपरिहार्यत्वात् तत्तद्व्यक्तित्वमानिवन्य पर्यवसितपक्षत्वावच्छिन्नविषयताकानुमि
तिप्रतिबंधकत्वं तथापि च प्रत्यक्षानुमित्योर्लिंगिभेदेन कारणताभावमेदस्य तथा यथा यत्किंचित्सामानाधिकरण्येनैव व्याप्यत्वमिति प्रतिबंधकानुमितौ साध्याभावप्रत्यक्षत्वेन तत्तद्विशेष
नहेतुत्वेऽपि हेतुतावच्छेदकरूपेण समसमयावच्छिन्नभेदेन साध्याभाववत्त्वविशिष्टे मेवतावच्छेदकविशिष्टता निष्ठविषयताकस्य नहेतुत्वं च पूर्वमित्यादावधारणाय विषय
वच्छिन्नप्र [illegible] कारतानिरूपिततादात्म्यप्रकारतानिरूपिताधिकरणत्वप्रकारतानिरूपितवृत्तित्वप्रकारतानिरूपिताभावप्रकारतानि
रूपितप्रकारतानिरूपितपर्यवसितविशेष्यतानुमितित्वमायत्वेन हेतुत्वं च संयुक्तसमवायसंबंधेनावच्छिन्नमिति प्रतिसाध्यवद्भेदव्याप्त्यभावगाहिपरामर्श
हेतुतामते च द्रव्यत्वेन द्रव्याभावत्वं च यमादायतत्र द्रव्यादिपरामर्शात्सम्यक्सत्त्वे धावच्छिन्नवह्निनिष्ठप्रतियोगिताकाभावविशेषकतावच्छेदकताकरण
त्वनिवेशाय गगनादिपरामर्शात्संयोगसंसर्गकपर्यवसितोऽदृष्टवत्त्वादिवत्प्रतीतिपारणाय पर्यवसितो दृष्टत्वावच्छिन्नविधेयकसंयोगसंसर्गकानुमितित्व
निसमवायसंबंधावच्छिन्नवह्निनिष्ठावच्छेदकतानिरूपितसंयोगसंबंधावच्छिन्नवह्निनिष्ठावच्छेदकतानिरूपितप्रतियोगितासंबंधावच्छि
न्नप्रकारतानिरूपितभेदनिष्ठप्रकारतानिरूपिताधिकरणतानिरूपितवृत्तित्वप्रकारतानिरूपिताभावप्रकारतानिरूपितधूमप्रकारतानि
रूपितपर्यवसितविशेष्यतानुमितित्वमायत्वेन हेतुत्वमित्यन्याभाववत्ति तोपदर्शितव्याप्यत्वगाहिपरामर्शस्य हेतुतामते एकावच्छेदकत्वानुप
वेशनिरूपितत्वोपनिवेशनीयविषयतया नानुमितिजनकतावच्छेदककोटिप्रविष्टस्यान्यूनानतिरिक्तव्याप्तितया प्रतियोगितावच्छेदकताभावघटितोपप
दर्शितव्याप्यत्वगाहिपरामर्शस्यानुमितिहेतुत्वे जनकतावच्छेदकघटकीभूतरूपघटकत्वादित्याचार्यमते अनुमितौ व्याप्तिविषय
तायामुपदर्शितानुमितिस्वव्याप्याभावसंपादकत्वेऽपि तत्र वादिभिरनुमितौ व्याप्तिविषयतानुपगमेऽनुमितिप्रतिपत्तावदाप्यस्याग्रहणहेतुता
कल्पनमेव लाघवात्तथाहि आचार्यमते वह्निव्याप्यधूमवानयमित्यादौ वह्निमानित्यनुमितेर्वह्निव्याप्यधूमपर्यंतविषयत्वपर्यंतविषयत्वेऽपि तत्र व्याप्त्यादिवैशि
ष्ट्यावगाहितया परिष्कारे वैशिष्ट्यमिति तत्त्वविषयतानुपपत्तिर्बुद्धिप्रतिबिंबोपलक्षितावच्छेदकप्रकारकानिश्चयस्य हेतुत्वेन तत्तद्विशिष्टोपनीतावच्छेद
कप्रकारतानिरूपितविषयताव वह्निव्याप्यधूमप्रकारकानिश्चयस्यापि प्रमाणपक्षनीयत्वात्पक्षधर्मपरामर्शस्य मानसोत्पत्तिनियताधिकरणतानिरूपितस्थलेऽसंभवोऽत

अत्र यद्यपि पर्वतो वह्निमानिति सिद्धिकाले वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति सिद्धिकालेपि तादृशानुमितिरसंभवा तथापि घटत्वे तथापि प्रकारतादेशानुपातघटत्वपर्वतत्व इत्यादि

अनुमितिं प्रति परामर्शस्य व्याप्तिग्रहो हेतुत्वकल्पनं निरर्थकमेवेति । ननु तथापि यथानुमितिं प्रति परामर्शो हेतुः तथापि विशेष्यतायां पक्षतायां वह्निव्या
प्यधूमवान् पर्वत इत्यादि परामर्शकाले वह्निव्याप्यधूमवान् पर्वतो घटवानित्यनुमित्यापत्तेः । वह्निव्याप्यधूमवान् पर्वत इत्यादि परामर्शे पर्व
तावच्छेदकप्रकारकोपि नावस्य वह्निव्याप्यधूमनिष्ठावच्छेदकत्वानिरूपकप्रकारतानिरूपितपर्वतत्वावच्छिन्नविधेयताशालिनुमितित्वावच्छिन्नं प्र
तिहेतुत्वेन तस्यापि तत्कार्यतावच्छेदकाक्रान्तत्वात् । न च वह्निव्याप्यधूमवान् पर्वतो घटवानित्यनुमितित्वादेः कार्यतानवच्छेदक २४
त्वात् तादृशानुमित्यापत्तेरसंभवः । वह्निव्याप्यधूमनिष्ठावच्छेदकत्वाभिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालित्वा
वच्छिन्नत्वेनैव तदा वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्यनुमितेरेवोत्पत्तिः तथा च वह्निव्याप्यधूमवान् पर्वतो घटवानित्यनुमितिं प्रति २६
सिद्ध्यभावविशिष्टवह्निव्याप्यधूमवान् पर्वतो घटवानिति सिद्ध्यभावस्य हेतुत्वेन तत्सत्त्वे तथाविधसिद्ध्यभावकूटस्य कारणत्वात् तथापि
धानुमित्स्याप्रतिबन्धकत्वादेवेति । नव्यानां मते तादृशानुमितेः प्रसिद्ध्या तादृशानुमितिं प्रति तथाविधसिद्ध्यभावस्य हेतुत्वे कल्पनमप्यसंभवदुक्ति
कमिति वाच्यम् । तन्मते तादृशानुमितेः प्रसिद्ध्या तथाविधानुमितिं प्रति तथाविधसिद्ध्यभावस्य हेतुत्वे वह्निव्याप्यधूमवान् पर्वतो घटव्याप्यवानिति
परामर्शकाले वह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वत इति वह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वतो घटवानित्यनुमितेः प्रसिद्धत्वात् वह्निव्याप्य
मा[illegible]ति इत्यत्र घटव्याप्यवानिति इत्यत्र पर्वतत्वावच्छिन्नधर्मावच्छिन्नविधेयताशालिनुमितित्वावच्छिन्नं प्रति त
थाविधानुमितित्वविशिष्टभावविशिष्टवह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वतो घटवानिति सिद्ध्यभावस्य हेतुतया तत्काले वह्निव्याप्यधूमवान् ११८०
पर्वतो घटवानित्यनुमितिरिति तादृशानुमित्यापत्तेः तादृशसिद्ध्यभावस्य वह्निव्याप्यधूमावच्छिन्न

(तादृशीव्याप्याऽशेषङ्गतिसाधारः)

घटव्याप्यावच्छिन्नपर्यवसानत्वावच्छिन्नविशेष्यतानिरूपितविषय घटविधेयतानिरूपितानुमितित्वमेव कार्यतावच्छेदकमस्तु किंतु परामर्शीयविशिष्टाभावप्रतिय
मंस्य कार्यतावच्छेदकत्वेनेति तादृशानुमितेस्तदनाक्रान्ततया तत्रापत्तिः न वा तादृशानुमितित्वावच्छिन्नस्यापत्तिः। तादृशसत्तानोपयोगिवन्हि
व्याप्यधूमवान्‌ घटव्याप्यवान्पर्वत इति विशिष्टावगाहिपरामर्शात्‌ विशिष्टस्यैकप्रकारकनिर्णयाभावादिति वाच्यं तथासति तादृशविषयासिद्धिकाले घटव्याप्यवा
वन्हिव्याप्यधूमवान्‌ घटव्याप्यवान्पर्वतो घटवानित्युपस्थिते विषयविषयानुमितेरनुत्पत्त्यापत्तेः विशिष्टाभावप्रतियोगिवन्हि
व्याप्यीयकार्यतावच्छेदकत्वस्यात्र संभवादिति चेन्न वन्हिव्याप्यधूमवान्‌ घटव्याप्यवानित्यादिपरामर्शस्य तादृशकालेऽनेन
न्हिव्याप्यधूमवान्‌ घटव्याप्यवान्पर्वत इत्येतादृशपरामर्शकाले तथाविधाया अनुमितेर्व्याप्तिविषयकत्वानभ्यु
पगमे तु तस्याः धूमादिव्याप्तिविषयकत्वे वन्हिव्याप्यवान्‌ पर्वत इति ज्ञानस्य तावच्छेदकं निर्णेयाविषयत्वापत्तेः हितत्वाच
न्हिव्याप्यधूमवान्पर्वत इति परामर्शाजन्यकाले तादृशघटव्याप्यवान्‌ पर्वत इत्यादिपरामर्शकाले धूमव्याप्यवान्पर्वत इत्याद्यनुमित्यापत्तिवारणाय तादृशपराम
र्शस्य सातत्येन हेतुत्वं कल्प्यते गौरवस्य दुर्वारत्वात्‌ तदुक्तं दीधितौ व्याप्तिविषयकत्वमाचार्यमते न दुष्टमित्याहुः। तदसत्‌। तथाहि विनश्यत्तावच्छे
दकप्रकारकनिर्णयस्य कार्यतावच्छेदकत्वे विनाश्ययोग्यताहेतुतावच्छेदकत्वे तथाविधानुभवत्वं वा आदेयम्‌ तौ व्यभिचारात्‌ विनश्यत्वेन स्वसाध्या
वच्छिन्नत्वात्‌ न च जन्यत्वं कार्यतावच्छेदककोटौ निवेश्यमिति वाच्यं जन्यत्वस्य ध्वंसप्रतियोगित्वप्रागभावप्रतियोगित्वकालिकसंबन्धेन घटत्वादिमत्वेन
बहुविधत्वात्तेषां विनिगमनाविरहेण निवेशासंभवात्‌ कार्यकारणभावानन्त्यप्रसंगात्‌ किंतु विनष्टतावच्छेदकनिर्णय कार्यतावच्छेदककोटिप्रवेश

निवेशेऽभावे मानाभावात्‌ अतस्तस्य कालो घटितत्वे तद्धर्मस्य मित्यादि विनिगमनाविरहेण स्वकालत्व ... अन्यमात्रस्य ... सोपाधित्वम् ...
नित्यत्वाभावे कालिकसंबन्धावच्छिन्नस्वसंबन्धेन ... प्रतियोगितावत्त्वेन हेतुत्वे ... अन्यत्वनिवेशे गौरवाद्धि ... प्रतियोगित्वसंबन्धेन ध्वंसत्वमेव तत्स्यात्‌
तदेव विशिष्टता ... प्रत्यक्षत्वाद्यवच्छिन्ने तादृशी ... प्रयोजकता पर्यवसिता ... ॥ घटादित्यर्थः

(तथाच कारणतासिद्धान्त ...)

१ (विशेषणताधीनान्यतावच्छेदकतयापि दंडत्वप्रत्यक्षत्वेऽभिमतमप्रकृते आदि कन्यनागोतरप्रमेयादिहेतुत्वमनुपपत्तिं) १

तथैव दण्डत्वादिप्रत्यक्षव्याप्तेरत्र मम दण्डादिप्रत्यक्षसाधारणी जातिमेवकार्यतावच्छेदकस्वीकृत्य सैव तत्कार्यतावच्छेदिका मीमांसकाः। एवं चाचार्यमतेऽनिष्टापत्तिप्रकार
कान्तर्णीयरूपविनिगमनाविरहेण कारकान्तर्णीयकार्यतावच्छेदकानां तत्तथाविधानुमितेः स्मृतिपरामर्शस्य प्रकारापत्तिवारणायानुमि
तेः प्रतिबन्धकपरामर्शस्वरूपस्य तेन तुल्यकल्पनमानस्य तत्स्वभावे तत्र तन्मते अनुमितौ व्याप्तिविषयतासम्बन्धेन उपदर्शितलाघवात्र कार्यतावच्छेद
समाधानमाहुः। नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे प्रतिबन्धकतावच्छेदकविषयताविशेषघटितस्य अनुभवत्वमेवावच्छेदकतावच्छेद
कप्रकारकनिर्णयकार्यतावच्छेदकत्वमुच्यते। तथाचाचार्यमते व्याप्तिविषयताशुभगमे उपदर्शितलाघवविनिगमनाविरहमेवानुनित्यवृत्तिधर्मस्य
कार्यतावच्छेदकत्वे कारणतानुपपत्तिः। तथा हि कारणत्वं यत्र नियतपूर्ववृत्तित्वं तत्र कार्यत्वं तत्पूर्वक्षणावच्छेदेन कार्याधिकरणे दण्डाभावसत्त्वात्
यत्कार्यतानियतपूर्ववृत्तित्वं तद्धर्माश्रयत्वं तत्पूर्वक्षणावच्छेदेनापरघटरूपकार्याधिकरणे दण्डाभावसत्त्वात् दण्डस्य
हेतुत्वानुपपत्तिः। तस्मात्कार्यतावच्छेदकावच्छिन्नयावद्व्यक्तिसत्त्वे तद्व्यक्तिनिष्ठत्वं तत्पूर्वक्षणावच्छिन्नतत्तद्व्यक्तिस्वाधिकरणाव
त्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव कारणत्वं वाच्यम्। तथा च नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे नित्यव्यक्तेरपि तद्व्यक्तित्वे तत्पातित्वापा
तद्व्यक्तिपूर्वक्षणाप्रसिद्धेः प्रकृते कारणत्वानुपपत्तिरिति चेन्न। कार्यतावच्छेदककारणतावच्छेदकभेदेन कारणताया भिन्नत्वात् यत्र नित्यवृ
त्तिधर्मः कार्यतावच्छेदकः तत्र नित्यव्यक्तिसाधारणमेव तत्कारणत्वमिति न नित्यव्यक्तावनुपपत्तिः। यो यो पि केचित्तु अनुमितिं प्रति परामर्शस्य हेतुत्वे अ
प्रामाण्यज्ञानानास्कन्दितविशेषणवत्ताज्ञानमात्रस्य कारणत्वे प्रमेयविशेष्यकवह्निविधेयकानुमित्यापत्तिः। विशिष्टवैशिष्ट्यबुद्धिं प्रति विशेषणतावच्छेद
तानिरूपकत्वकार्यतावच्छेदकस्य स्वातिप्रसक्तधर्मस्य सम्भवात् निरूपकत्वप्रकारकत्वस्वरूपकारणताघटककार्याधिकरणतानिरूपकत्वरूपकार्यत्वेऽपि
इत्यादिप्रसक्तत्वाभावच्छेदकत्वमंगीकृत्य तेन सत्त्वोऽतिशयमादि अन्यतावच्छेदकतयापि स्वर्गादिविषयेऽत्र सिद्धिर्न स्यात् तत्रापि व्याप्तिरूपमादि अन्यत्वोऽतीयस्वर्गत्वप्रतीतिनामेव यत्र तात्
पर्यमते सर्गत्वादिसंभवात् इति) २ (अथ यदि हि तत्पूर्वक्षणावच्छेदेन तद्व्यक्तिकालीनोत्पत्तिकध्वंसप्रतियोगित्वरूपत्वं तद्धाधिकरणक्षणध्वंसानधिकरणत्वरूपत्वं घटस्य घटोत्पत्तिघटितलाघवादित्यभिप्रायः) १ रामः०

तं त्वेण हेतुत्वघटकत्वव्यवमध्यमप्रयध मेव। न चानुमितिजनकतावच्छेदककोटौ मुख्यविशेष्यतापाभिवे गुरो प्रवेशो अनवच्छिन्नत्वादि दूषितत्वात् । तथा सत्यनु
मितिजनकतावच्छेदककोटौ वह्निव्याप्यधूमवत्पर्वतवान् यं हेत्वात्वत्योप तमोत्पर्वत्वं तामात्रत्व व्याप्त्यावच्छिन्नप्रतियोगिताकभेदकू
टस्यानिवेशेन तत्र लाघवसंभवात्। न चाचार्यमते पक्षतावृत्तिविशेष्यकपरामर्शस्यानुमितिहेतुत्वे उपदर्शिततेतरबाधानां अनुमितिं प्रति
स्यात त्वेण हेतुत्वकल्पनापि वेयव लाघवसंभव ... अनुमितिजनकतावच्छेदककोटौ तत्तत्व्याप्तिव्याप्यावच्छिन्नप्रतियोगिताकभेदकूटस्य
निवेशे तेषां विशेष्यताविशेष्यभावे विनिगमनाविरहेण अनंतकार्यकारणभावबाहुल्यात् कारणतावच्छेदकगौरवात् । तदपेक्षयात्तत्पदोपि
धेप [redacted] बाधानां किंचितामनुमितिं प्रति स्वातंत्र्येण हेतुत्वकल्पनमेव ज्याय इति । ननु एवं बाधानां मानेपि विवादे पक्ष ... धर्मिविशेषविशेष्यसमुच्च
यविशेष्यकपरामर्शस्येवानुमितिहेतुत्वमसंभवात्। अन्यथा ताद्दशं विरोधस्यपक्षत्वेनापि दुःसमाधेयत्वात् न किंचिदेतत।
केचित्तु आचार्यमतेऽनुमितौ व्याप्तिविषयतास्वीकारे धर्मलिंगरूपपरामर्श अन्यानुमितिं प्रति अनुमित्सा विरहविशिष्टप्रत्यक्षसामग्र्या
पाः व क्रियाव्याप्याभावाधारत्वं तो घटवान् नित्यादिविशिष्टवैशिष्ट्यबोधात्मकपक्षस्य सामग्र्याः प्रतिबंधकत्वकल्पनेन लाघवसंभवात्। तथा
हि तादृशसामग्रीकाले वह्निव्याप्याभाववान् पर्वत इति निर्णयस्य विशेष्यतावच्छेदकप्रकारकनिर्णयविषयावह्निरूपकेले न न तत्र वह्निव्याप्यधूमव
त्वरूप पर्वतविशेष्यकज्ञानप्रतिबंधकीभूतबाधनिर्णयसत्वात् तेन तद्देयत्र तथाविधानुमित्सापत्ति ... धारणात् संभवात्। तथाविधानुमितिं प्रति
तथाविध प्रत्यक्षसामग्र्याः प्रतिबंधकत्वकल्पनेन प्रयोजनविरहेण तादृशव संभवात्। अनुमितौ व्याप्तिविषयतायां अनभ्युपगमे यदि ह्व्याप्या भा
वत्पर्वत इति ज्ञाने स्वधर्मधान्यवर्तो वह्निमान् इति ज्ञानप्रतिबंधकत्वात् तथाविधसामग्र्याः फलेते तथाविधानुमित्सापत्तिप्रधारणात् तेन कारणा
२१

२

संभावनाकृतमत्तास्यवर्ण्हतो यन्निष्ठमानित्वानुमितिं प्रति तथाविधसामग्र्याः स्वतंत्रप्रतिबंधकत्वकल्पनेन निवयमुपक्रमितिमोरवादा दार्थमतेऽनुमितौ व्या
प्तिविषयतास्वीकारस्याप्रयोजकत्वात् ॥ तदस्तु ॥ अनुमितौ व्याप्तिविषयताया अनभ्युपगमेपि ऽयमथावर्ण्हतो यन्निष्ठमानित्वनुमितिं प्रति
तथाविधसामग्र्याः स्वतंत्रप्रतिबंधकत्वाकल्पनेनानुमितौ व्याप्तिविषयताभ्युपगमे पूर्वोपदर्शितं तत्र व्यस्याः सम्भवात् ॥ तथाहि ॥ अनुमितौ
व्याप्तिविषयताभ्युपगमेपि वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्याकारकपरामर्शजन्यानुमितौ वह्निव्याप्यधूमवत्तथाविधसामग्र्याः प्रतिबंधकत्वं कल्प
नीयं ॥ अन्यथा तादृशपरामर्शकाले तथाविधानुमित्यापत्तेः ॥ धूमोऽस्त्विति चेत् । एवं यानुमितौ न हि नाभ्युपगमेपि तत्र तादृशसामग्र्याः प्रतिबंधकत्वं
कल्पनीयं धर्मितावच्छेदकमति वैनुपधूममति तत्प्रकारतानिरूपितधर्मितावच्छेदकतासंबंधेन वह्निविधेयकानुमितिं प्रतिस्वी
यानुमितिनिष्ठविधेयतानिरूपितविधेयकत्वप्रकारतानिरूपितप्रकारतासंबंधावच्छिन्नप्रतियोगिता
कत्वाभावविशिष्टप्रत्यक्षेपि तथाविधपरामर्शसामग्र्याः प्रतिबंधकत्वकल्पनेनैव तथाविधप्रत्यक्षसामग्रीकाले धूमवान्
वह्निमान् निश्चनुमितिवारणात्संभवात् ॥ तथाविधानुमितिप्रति तथाविधप्रत्यक्षसामग्र्याः प्रतिबंधकत्वं स्वामतेन न कल्प्यत इति गौरवम्
प्रकृते ॥ न चैवं सति तथाविधप्रत्यक्षसामग्र्या इतरकारणविशिष्टविधेयतावच्छेदकप्रकारकानिर्णयव्यक्तिकाद्याः अभावस्य पर्वेषा हेत्व
द्रासत्वेन तत्सामग्रीकाले वि पर्वतत्वविधेमदभावसत्वात् कविनिष्ठतावच्छेदकसंबंधेन वह्निविधेयकानुमित्यापत्तेः इदंदिते तथाप्यंशे तद्देवकता
लीन स्व संबंधेन तदितरकारणविशिष्टा तथाविधसामग्र्याः प्रतिबंधककल्पनात् ॥ न चैवं कथं निश्चयविधानुमितिकाले पुरुषांतरीयतथाविधप्रत्यक्ष
सामग्रीकाले तस्यानुमित्युत्पत्तिरिति वाच्यं ॥ तत्पुरुषीयत्वं विनिष्ठविशेषत्वेन प्रतिबंध्यप्रतिबंधकभावकल्पनात् ॥ न चैवं गौरवमाशंकनीयम् ॥

॥गम०

तत्पुरुषीयत्वादेरपि यत्किंचिद्विशेषणतावच्छेदकतया आत्मनि सत्त्वात् समवायसंबन्धेन पुरुषभेदेन कार्यकारणभावबाहुल्यस्यावश्यकत्वात् एवं तत्त्वादिभेदेन प्रतिबध्य
प्रतिबंधकभावकल्पनायाः प्रसक्तत्वादिति । अपरे तु अनुमितौ व्याप्तिविषयतानभ्युपगमे तेजोव्याप्यधूमवान् पर्वत इत्यादिपरामर्शकाले वह्नि
भिन्नतेजोभाववान् पर्वत इत्यादिबुद्धेर्वारणाय धूमवान् पर्वतो वह्निमानित्यनुमितिवत् तद्व्याप्यत्वारोपे धूमवान् पर्वतो वह्निमानित्यनुमि
तिप्रसक्तौ वह्निव्याप्यधूमवत्परामर्शस्य हेतुताया असंभवः । अनुमितौ व्याप्तिविषयताभ्युपगमे तु वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्याद्यनुमितिं प्रति धूम
परामर्शो हेतुः तथा तेजोव्याप्यधूमवान् पर्वत इत्यादिपरामर्शकालीनतत्प्रतिबंधकबाधजन्यतेजोव्याप्यधूमवान् पर्वतो वह्निमानित्याद्यनुमिते
र्धूमपरामर्शकार्यतावच्छेदकाक्रान्ततया न तत्र व्यभिचारोऽभावेनोपदर्शितबाधकान्वय[illegible] इति । न च तथापि धूमपरामर्शकालीनतत्प्रतिबंधकबाध
जन्यवह्नित्वावच्छिन्नविधेयकानुमितिस्तदानुमितौ व्याप्तिविषयतानभ्युपगमे उपदर्शितहेतौ व्यभिचारस्तदवस्थ एवेति वाच्यं तदनुमितौ व्यापकतावच्छेदक
रूपेणैव विधेयभाननियमेन तत्र तेजस्त्वरूपेणैव वह्निविधेयकानुमितिरंगीकारादिति वाच्यं तथापि धूमपरामर्शकालीनतत्प्रतिबंधकबाधजन्या
नुमितेरस्य धूमपरामर्शं तौ वह्निमान्वेति संशयाभावस्यानुमतया सिद्धत्वात्तत्र रक्षार्थं तत्र वह्नित्वादिरूपेणाविधेयकानुमितेरेव परामर्शकार्यत्वात् ॥
न च तत्र तथापि उपदर्शितनियमभंग इति वाच्यं तादृशस्थले तत्र बाधादिरहितस्थले तत्प्रकारकविधेयनियमाभ्युपगमात् । अत एव व्यापकतावच्छेद २
क[illegible]व्यापकरूपेण तादृशस्थले बलादनुमितौ भासत इति पक्षधर्मतापि संगच्छते । तथा चानुमितौ व्याप्तिविषयतायाः सत्त्वे उपदर्शितयुक्तिर्निरवका
धेयाय तु तथापि विधेयतासंबन्धेनानुमितौ वह्निप्रकारतानिरूपितस्य तेजस्त्वस्यापि भावात् तत्र तेजस्त्वस्य विधेयतावच्छेदकत्वेऽपि तेन नद्यादि अ
नुमितौ व्यापकतावच्छेदकत्वेन गृहीतस्य धर्मस्य विधेयतावच्छेदकत्वनियमात् तत्र व्याप्यत्वपरामर्शजन्यतावच्छेदककोटौ वह्नित्वावच्छिन्नविधे

(रत्वविषयताद्वयस्वीकारे तेजस्त्वीयवह्निमान् निरुक्तहेत्वस्याद्द्विस्येकृ विधेयतावच्छेदकत्वयुग्मस्य च माधमितिभावः)

यतानिवेशेनैव तथाविधाद्धूमितो व्यभिचारवारणसंभवात् अनुमितौ व्याप्तिभानं निर्युक्तिकमेवेति। तादृशतात्पर्यविधेनेतरबाधजन्यानुमितौ

तेजस्त्वस्वावच्छिन्नस्यापि विधेयतावच्छेदकत्वे व्याप्तिविरहात्। अत एव तेजस्त्वविशिष्टवह्न्यादिव्यापकविशिष्टे भिन्ने तेजो भावव्यक्ते तेकालीन

तेजोव्याप्यधूमवान्पर्वत इत्यादि परामर्शस्यापि तेजस्त्वविशिष्टवह्निमान्पर्वत इत्यनुमितिप्रतिबन्धकत्वेन हेतुत्वेन कल्प्यते तादृशपरा

मर्शकाले तथाविधेतरबाधकालीनतेजोव्याप्यधूमवान्पर्वत इत्याकारकपरामर्शाद्वह्निनस्तासाम्यात् धूमधूमवान्पर्वत इत्याकारके तेजस्त्वा

भयावच्छिन्नविधेयताकानुमितिरुत्पत्तौ यत्तत्तत्धाविधफलनिर्वाहाय। तथाविधेतरबाधजन्यानुमितौ यद्वह्नित्वस्यापि विधेयतानवच्छेदकत्वे

तु उपदर्शितपरामर्शकाले तदुभयावच्छिन्नविधेयताकानुमितेनानुभाविकत्वात् तन्निर्वाहार्थं तत्तदुभयधर्मावच्छिन्नविधेयताकानुमितिप्रति

६२ धाविधपरामर्शस्य तत्र हेतुत्वकल्पनस्यावश्यकत्वात् गौरवस्य प्रमाणिकत्वाद् दूषणमिति। न चानुतो व्याप्तिविषयतानवच्छेदकमेत धाविधे

तेवाधजन्यानुमितेरपि धूमपरामर्शजन्यतावच्छेदककूपविनि[illegible]त्वावच्छिन्नविधेयताकानुमितित्वरूपकार्यतावच्छेदकाक्रान्ततया धूमपरा

मर्शहेतुतायां व्यभिचारस्यावश्यकत्वादेवतद्धारणार्थं अनुमितौ व्याप्तिविषयतास्वरूपगमनस्यावश्यकत्वादिति। न च अनुच्छेदवान् वह्न्यवच्छिन्नविधे

यतानामानुमितित्वस्यैव कार्यतावच्छेदकत्वे पर्वतादि धूमवान् वा तत्तदधाविधेतरबाधजन्यानुमितौ व्याप्तिविषयतासुप

गमप्रयोजनत्वमूर्तितधाविधापितेजस्त्वविशिष्टवह्निविधेयताकानुमितिप्रतितेजस्त्वविशिष्टवह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शस्य हेतुतायाः

तथाविधेतरबाधजन्यानुमितौ व्यभिचारस्य दुर्वारत्वात् तन्निवारणार्थमाचार्यमते अनुमितौ व्याप्तिविषयतांगीकारः स एव स्फुरतीति कृतमपा

र्थः। यत्त्वनुमितौ व्याप्तिविषयत्वाभावे अवच्छिन्नसंयोगसंसर्गघटितव्याप्यवत्तायाः परामर्शस्य संयोगसंबंधघटितवह्निव्या

[illegible]

रकप्रकारकनिर्णयस्य धर्मिविशेषमनंतर्भाव्य हेतुत्वकल्पनेन तेनोपदर्शितापत्तिवारणासंभवादिति धर्मिविशेषमनंतर्भाव्य अनुमितिंप्रति स्वातंत्र्येण हेतु
त्वकल्पनायमुक्तत्वेऽन्यमनुमितौ व्याप्तिविषयतेत्याहुः। तदसत्। एकपर्वते वह्निव्याप्यधूमपरामर्शात् पर्वतेतरे वह्निविधेयकानुमितिर्न जायते
इति केन निर्णीतं येन तत्कारणार्थं धर्मिविशेषमंतर्भाव्य अनुमितिपरामर्शयोः स्वातंत्र्ये हेतुहेतुमद्भावः कल्पनीयः। भवेत् यदि तथानुभवः। तथापि वि
शिष्टवैशिष्ट्यबोधं प्रति विशेष्यतावच्छेदकप्रकारकनिर्णयत्वेन धर्मिविशेषमंतर्भाव्य कार्यकारणभावकल्पने नैवोपदर्शितापत्तिवारणासंभ
वादनुमितिं प्रति परामर्शस्य स्वातंत्र्ये हेतुत्वकल्पना निरर्थकैवेति। न च तथा सति एकपर्वतत्वविशेष्यकवह्निव्याप्यवत्तानिर्णयात् पर्वतेतरविशेष्यक
विशिष्टवैशिष्ट्यबोधानुपपत्तिरिति वाच्यं। इष्टापत्तेः। अनुभवस्य तु मध्यनिविष्टत्यापत्तेश्चेति। यत्तु पर्वतत्वसामानाधिकरण्येन वह्निव्याप्यवत्ता
निर्णयात् पर्वतत्वावच्छेदेन तथाविधविशिष्टवैशिष्ट्यावगाहिबोधवत् सिद्ध्यभाववैशिष्ट्यात् पर्वतत्वावच्छेदेन वह्निविधेयकानुमितेरव्यापत्तेरि
ति [illegible] यच्छेदकावच्छेदेन अनुमितिं प्रति अवच्छेदकावच्छेदेन परामर्शस्य स्वातंत्र्येण हेतुत्वकल्पनमावश्यकमिति वैतं अनुमितौ व्याप्तिविषयतेति।
तदसत्। सिद्ध्यभावेन तथाविधानुमितिजननेऽपि हेतुसंयोगसंबंधघटितवह्निव्यापकतावगा [illegible] धूमविशिष्टसंयोगसंसर्गकहेतुमत्तावगाहिपराम
र्शयोर्विशिष्टसंयोगसंबंधघटितवह्निव्यापकतावगाहिपरामर्शयोरन्यतरस्य सत्त्वात् सहकारित्वकल्पनेन तदानीमवच्छेदकावच्छेदेन वह्न्यनुमित्यापत्ति
वारणासंभवात्। अन्यथानुमितिं प्रति परामर्शस्य स्वातंत्र्येण हेतुत्वाकल्पने अनुमितौ विधेयतानुपपत्तिर्विशेष्यतावच्छेदकप्रकारकनिर्णयप्रकार्य
तावच्छेदकौ यौ विधेयताया अनवच्छिन्नौ इति चेन्न। सिद्धिबाधविषयिताविरहविशिष्टबाधसिद्ध्यभावस्य कार्यतावच्छेदकत्वात् विधेयतया अनुमितौ विधेयता
।(विधात्ववह्निमात्रवर्तीतो दरअनितोपि वह्निमनुमिनोमीत्याद्यपदेशोऽभावः)।

न्नालिङ्गोपपत्तेः। सिद्धसाध्यपार्थतावच्छेदकस्फोटोनुमित्युद्देश्यतावच्छेदकमात्रानुभवकः। अन्यथापर्यतोवत्निमानिस्येताह्नसिद्धिकालेवह्निधर्मितावच्छेद
कीभूतपर्वतत्वविधेयकानुमितौ न्याप्युपपत्तेरिति। अत्राहुः। आचार्यमतेऽनुमितौ व्याप्तिविषयतावगभ्युपगमेविलिङ्गत्वेनैव्याप्यमितिरीत्यावह्निव्याप्यधूमवृ
पर्वततत्वेनभयधर्मितावच्छेदकीकेत्वे अह्नि व्याप्यधूमपरामर्शकालेवह्निव्याप्यधूमवानपर्वतोवह्निमान्व्याप्यधूमवानहं व्यापारकपरामर्शः
तवह्निव्याप्यधूमवानपर्वतोवह्निमानिस्यनुमितिनिर्वाहायतस्यानुमितिप्रतिस्यातं त्र्येणहेतुत्वेकल्पने गौरवं तदभ्युपगमेतु तदाद्युपर्व
तत्वधर्मितावच्छेदकवह्निव्याप्यधूमपरामर्शस्यात्रभूपकल्पनेतद्वात्तदानीं वह्निव्याप्यधूमवानपर्वतोवह्निमानिस्यनुमितिर्यहेत
व्याविधपरामर्शस्यतं त्रहेतुत्वेके[illegible]भावात्। मिश्रामांघवाद्यनुमितौ व्याप्तिविषयतासिद्धेः। नचैतथापिधपरामर्शेऽनुमायमाचार्यम
तेवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितिस्वीकारेचिंतामणिकारमतावैलक्षण्यापत्तिरितिवाच्यं। तेनसूतेरभावात्। केचित्तु अनु
मितौ व्याप्तिविषयतानभ्युपगमेवह्निव्याप्यधूमवान्पर्वतइत्याद्यपरामर्शकालेवह्निव्याप्यधूमवस्पर्वतास्ववोयेस्वभावधारणस्यादितरवा
धदन्न्यापबह्निव्याप्यधूमपर्वतत्वोभयधर्मितावच्छेदकीभूतस्वधर्मविधेयकानुमित्युपपत्तयेतथाविधानुमित्यावच्छिन्नं प्रतितथाविधवस्था	त
धस्यपरस्परातं त्र्येणहेतुत्वकल्पनेगौरवं। तदृशोकारेतुतथाविधेतरवाधेऽनुमायापर्वतवह्निन्नोधववह्निव्याप्यधूमप्रकारकनिर्णयस्यावश्यकत्वात्
ततएवतथाविधानुमित्युपपत्तेः। तथाविधेतरबाधस्यानुमितिंप्रतिस्वातंत्र्येणहेतुत्वाकल्पनप्रयुक्तलाघवमक्षतमेवेत्याहुः। तदसत्। अनु
मितिंप्रतिपक्षसमुच्चयविनैकपरामर्शस्यहेतुतयाविलिङ्गमितौ व्याप्तिविषयताभ्युपगमेपितथाविधानुमितिंप्रतितथाविधेतरबाधस्य	रा१०
(नचैतादृशाधयकालेऽपुलव्यधीविरोध्यताभ्युलिपरामर्शलाघवंतरभावेआलोकपरामर्शकालेतदनुपपत्तेः१)

पकतावगाहि अवच्छिन्नसंयोगसंसर्गकधूमव्यापकतावगाहिपरामर्शयोः परस्परकार्यकारणभावे तयोः परस्परजन्यानुमितौ व्यभिचारस्य दुर्वारत्वात् तथा
विधपरामर्शाद्यामेवकारकत्वरूपप्रकारकत्वं तो हन्तुमकं। वह्निविधेयकावच्छिन्नसंयोगसंसर्गकानुमितेरनुत्पादात्। न च शुद्धसंयोगादिसंसर्गक
घटितव्यापकतावगाहि अवच्छिन्नसंसर्गकधूमवत्तावगाहिपरामर्शाद्विधेयकावच्छेदेनानुमितेरुत्पत्तेरूपाया अनभ्युपगमात् तन्नानुपपत्तिर्
सत्सम ति वाच्यं। मिश्रैः दण्डवच्छेदकावच्छेदेनानुमितेरभ्युपगमात्। तन्मते तदुपदर्शितदोषस्य दुर्वारत्वात्। अत एवानुमितिलक्षणस्य प्रमानुमितेरलक्ष्यत्वप
से यद्विधेयलिंगपरामर्शादिसाध्यवत्ताहेतुत्वेन शुद्धसमवायघटितसंबंधघटितगंधव्यापकतावगाहिप्रागभावकालावच्छिन्नसमवायसंसर्गकप
थिवीत्यादिहेतुकगंधप्रागभावकालावच्छिन्नघटपदाभिनन्दुष्टसत्स्वरूपपरामर्शजन्यप्रागभावकालावच्छिन्नसमवायसंसर्गकगंधविधेयकप्रत्य
मात्मिकानुमितौ अतिव्याप्तिवारणमपि दीधितौ संगच्छते। अन्यथा तुल्ययुक्त्या तादृशपरामर्शादपि अवच्छेदकावच्छेदेन तथाविधप्रमानुमि
तेरनुत्पादात् तत्रातिव्याप्तिवारणार्थं दीधितिकारस्य तथाविधः प्रयासः एवस्यादिति। न च शुद्धसंयोगावच्छिन्नसंयोगो संयोगत्वेन निवेश्य
तथाविधानुमितिं प्रत्युपदर्शितपरामर्शयोरेकरूपेण हेतुत्वान्न परस्परव्यभिचारः इति वाच्यं। अवच्छिन्नसंयोगसंबंधघटितताप्रामाण्य
ग्रहकालेऽवच्छिन्नसंयोगसंसर्गघटितव्यापकतावगाहिपरामर्शदशायां अनुमित्यापत्तिवारणाय शुद्धसंयोगसंसर्गघटिताप्रामाण्यग्र
हकाले संवृद्धसंयोगघटितव्यापकतावगाहिपरामर्शादनुमित्यापत्तिवारणाय च तथाविधयोः प्रामाण्यग्रहाभावानामेकत्रैव तेऽवच्छेदकत्वे
केसंसर्गघटिताप्रामाण्यग्रहकालेऽपरसंबंधघटितव्यापकतावगाहिपरामर्शादनुमितेरनुदयप्रसंगेन तेषामपि निष्ठा

तेजकत्वे [illegible] त्वी कृत्यपि निष्ठयत्तु धा विध परामर्शयोः प्रा
थैकारणाभावे स्वाधनस्यकुत्ताः । तथापि धर्मस्यानुरुद्धत्वोत् अनुमितेर्व्याप्तिविषयतांगीकारेत्तु अवच्छिन्नसंयोगसंसर्गघटितव्यापकताघ
टितव्याप्यवगाहिपरामर्शस्य तथाविधव्याप्यवगाह्यनुमितिप्रति हेतुत्वकल्पनेन धूमसंयोगसंबंधघटितव्याप्यवगाह्यवच्छिन्नसंयोगसंसर्गक
धूमवत्तावगाहिपरामर्शस्य तथाविधव्याप्यवगाह्यनुमितिप्रति हेतुत्वकल्पनेन च तयोः परस्परजन्यानुमितेर्न व्यभिचार इति सिद्धमनुमितेर्
व्याप्तिविषयकत्वे मितिताद द्वितीयमंदं । धूमसंयोगसंबंधघटितवह्निव्यापकतावगाहि अवच्छिन्नसंयोगसंबंधघटितधूमवत्तावगाहिप
रामर्शात्तु संयोगवत्त्वस्यावच्छेदकीभूतपर्वतत्वोभयसंबंधेन पर्वतो वह्निमानित्याकारकानुमितेर्दर्शनादाभ्युपगमात्तस्या एव यथार्थत्वेऽवच्छेद
कावच्छेदेनानुमितिस्वरूपत्वात् । तत्र नावच्छिन्नसंयोगघटितवह्निव्यापकतावगाहिपरामर्शहेतुतायां व्यभिचारः । तेनावच्छिन्नसंयोगस्य
योगसंसर्गकवह्निविधेयकानुमितेस्तत्वात्तथाविधानुमितिं प्रति तस्य हेतुत्वात् । तथा चाचार्यमते अनुमितेर्व्याप्तिविषयतानभ्यु
पगमेऽपि उपदर्शितपरामर्शयोः परस्परहेतुतायां परस्परजन्यानुमितौ परस्मिन्निति रीत्या व्यभिचारवारणासंभवात् मुख्यलंबकुजल्प
नेन । नव्याचार्यमते पर्वतो वह्निमानित्यादिरीत्या प्रतिबध्यतावच्छेदकस्य दुर्वचत्वप्रसंगः । तथाहि । तस्याः प्रतिबध्यतावच्छेदकं न पर्वतत्वा
वच्छिन्नविशेष्यकवह्निविधेयकानुमितित्वं । तथापि धर्मसिद्धिकाले यदि व्याप्यवत्तया धीः पर्वतो वह्निमानित्यनुमितिनुदयप्रसंगात् ।
नापि पर्वतत्वावच्छिन्नधर्मिकवह्निविशेष्यतानिरूपितप्रकारितानिरूपितविधेयतोऽनुमित्यनुमितित्वं तस्याः प्रतिबध्यतावच्छेदकत्वे वह्निव्याप्यवत्पर्वत इ
इत्यादिपरामर्शजन्यानुमितेरसंग्रहापत्तेः । तस्याः पर्वतत्वावच्छिन्नविषयतानिरूपितप्रकारतानिरूपितविशेष्यतानिरूपितत्वे विनिविधेयतामुल्लिख्य
त्वीकारानुपपत्तेर्वायत्तावच्छिन्नतानिर्णयोऽदुरुद्धरतया परामर्शस्य आधारवच्छिन्नसंयोगेन पक्षप्रकारकानुमितिनुपपत्ते नानुमतिरिति न व्यभिचार इत्यलम् ॥४

तेन प्रतिबध्यतावच्छेदकानाक्रांतत्वात् । नापि वह्निव्याप्यधूमवान्पर्वत इत्यादि तद्धर्मानवच्छिन्नविधेयतानिरूपितवह्निनिष्ठविधेयतान्तरस्वानुमितित्वं त
दोषस्तिपर्वतो वह्निमानित्यादिसिद्धिकाले वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शजन्य वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्या
द्यनुमितेरनुत्पत्त्यापत्तिः । आचार्यमते तेन तत्र चिंतामणिकारमतानुमितेरगौरवं स्यादिति चेन्न वा । आचार्यमते पर्वतो वह्निमानित्यादिसिद्धेः पर्वत
त्वादिरूपधर्मानवच्छिन्नोद्देश्यतानिरूपितवह्निविधेयताशालिस्वानुमितित्वावच्छिन्नं प्रति प्रतिबंधकत्वासंभवप्रमात् । वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्श
जन्यानुमितेरुद्देश्यतावच्छेदकत्वेन स्व...पर्वतत्वेऽपि गौरवान्न तस्याः सिद्धिप्रतिबध्यतावच्छेदकानाक्रांतत्वप्रसंगः । वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शजन्या
नुमितेश्चोद्देश्यतावच्छेदकत्वे स्वयं वह्निव्याप्यधूमस्यापि सत्त्वेन तस्या अपि नतथाविधसिद्धिप्रतिबध्यतावच्छेदकाक्रांतत्वप्रसंगश्चेति आचार्यमतेऽपि दोषः ॥ अ
त्रैव याचिकाः । वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शजन्यतावह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितिस्वीकारे मानाभावः । न च तत्स्मात्तथाविधानु
मितिस्वीकारे अन्यलिंगकपरामर्शजन्यानुमितौ व्यभिचारवारणाय धूमपरामर्शजन्यतावच्छेदककोटौ व्याप्यप्रकारतत्त्वं न निवेश्यमसत्त्वतद्धेतुतिलाघवतर्कसहकृ
तमनुमानमेव प्रमाणमिति वाच्यम् । अव्यवहितोत्तरत्वादिसंबंधेन वह्निव्याप्यधूमपरामर्शस्य पर्वतविधेयकानिश्चयविशिष्टानुमितिं प्रति वह्निव्याप्यधूमप्रकारक
पर्वतविधेयकनिश्चयस्य हेतुत्वे कल्पनीये अनुमितित्वमनिवेश्य अव्यवहितोत्तरत्वादिसंबंधघटितसामानाधिकरण्यसंबंधेन वह्निव्याप्यधूमप्रका
रकनिश्चयविशिष्टज्ञानत्वावच्छिन्नं प्रति वह्निव्याप्यधूमप्रकारकपर्वतविधेयकनिश्चयस्य हेतुत्वे कल्पनेन पर्वतो वह्निव्याप्यधूमवानित्याद्य
नुपपत्त्यावच्छिन्नं प्रति वह्निव्याप्यधूमवान्पर्वत इत्याद्याकारकापादकव्यतिरेकनिर्णयस्य स्वातंत्र्येण हेतुत्वाकल्पनेन लाघवाद्यसंभवात् आचार्यमते तु तथा
विधापत्तिं प्रति तथाविधनिर्णयस्य स्वातंत्र्येण हेतुत्वकल्पनस्यावश्यकत्वेन तथा चिंतामणिकारमतापेक्षया गौरवात् । वह्निव्याप्यधूमवान्पर्वत इत्यादिपय

(अत एव तर्कस्यापि धामस्थेप...
दिलोपानमप्याचार्याणां साधुसंगतमिति)

११

यत्रेदं चेत् । एवं च प्राचार्यमते शुद्धरूपवत्त्वावच्छिन्नविरोधिताकवह्निव्याप्यधूमाभावरूपापाद्यव्याप्यापादकेन तात्पर्यनिश्चयात् शुद्धरूपवत्त्वावच्छिन्नविरोधिताकवह्निव्याप्यधूमाभावापा
व्यतिरेकनिश्चयस्य हेतुता । तादृशपिलोचादेन वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमाभाववान्स्यादित्यापत्तौ गौरवात् तादृशापत्तिं प्रति आपाद्यव्यतिरेकनिश्चयस्य न स्वतंत्रेण हेतुत्वे
ध्वंस्यनमात्रहेतुविघटकत्वेनैव विरोधिताकविषयतानुपातिबुद्धिं प्रति विरोधितावच्छेदकप्रकारकनिर्णयस्य हेतुत्वेनैव निर्वाहः । एवमुक्तपारिभाषिकरूपसामग्र्या वह्निव्याप्य
धूमाभावाभाववान्निरस्याद्यव्यतिरेकानिश्चयसहकृता इत्यपि वह्निव्याप्यधूमाभावाभाववान्पर्वतो वह्निव्याप्यधूमाभावाभाववान्स्यादित्यापत्तिस्वीकारात् सत्यपि नापाद्यव्यति

मत्तत्त्व वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितिस्वीकारो निर्युक्तिकत्वं । अत एव घटादिप्रत्यक्षं प्रति वन्ह्यभावानुमितिसामग्र्याः प्रतिबंधकतायां तदवच्छेदक
कोटौ वह्निव्याप्यधूमवान्पर्वतस्तत्त्वाद्युक्तं तदभाववत्त्ववत्तानिर्णयाभावनिवेशो युक्तः । घटप्रत्यक्षे उक्तं च गुरुचरणैः । न च तत्प्रतिबंधकतावच्छेदककोटौ तत्त्वान्निवे
शो वह्निव्याप्यवत्तानिर्णयकाले वन्ह्यभावानुमितिजनकपरामर्शादिसत्त्वे घटप्रत्यक्षोत्पत्तौ बाधकाभावेन तत्र तथाविधसामग्र्यभावे
ते तादृशव्यभिचारेण तत्पायां सामग्रीप्रतिबंधकतावच्छेदककोटौ वह्निव्याप्यवत्तानिर्णयाभावनिवेशो आवश्यक इति वाच्यं । तत्र व्यभिचारस्य वारणार्थं प्र
तियसामग्रीप्रतिबध्यतावच्छेदककोटौ अन्यथासिद्धेः तादृशसामग्रीसंबंधेन वह्निव्याप्यवत्तानिर्णयविशिष्टत्वस्य निवेशात् । वह्नि
व्याप्यवत्तानिर्णयकाले वन्ह्यभावानुमितिजनकपरामर्शे तत्प्रकारकानाहार्यज्ञानसामग्रीबलात् घटादिप्रत्यक्षोत्पत्तिस्तथाविधनिर्णयाभाववादि
घटितवन्ह्यभावानुमितिसामग्रीकाले पि तादृशसामग्रीबलात् घटप्रत्यक्षोत्पत्तिरिति तुल्यत्वात् । एवं परामर्शाव्यवहितोत्तरक्षणे सति वन्ह्यनुमिति
प्रतिबंधकपरामर्शस्य हेतुत्वेनैव वन्ह्यनुमितेः अव्यवहितोत्तरक्षणोत्पत्तिकत्वादिति संबंधेन वह्निमत्परामर्शविशिष्टसामग्र्याश्रयत्वेन हेतुत्वे कल्पनेनैव तथाविध
निर्णयाव्यवहितोत्तरोत्पन्नघटादिप्रत्यक्षस्यापि तत्कार्यतावच्छेदकाक्रान्ततया तथाविधनिर्णयाव्यवहितोत्तरोत्पन्नघटादिप्रत्यक्षसामग्री
मध्ये तथाविधनिर्णयस्यापि निवेशो न वह्निव्याप्यवत्तानिर्णयाभावादिघटितवन्ह्यभावानुमितिसामग्र्या घटादितथाविधनिर्णयादिघटि
तघटादिप्रत्यक्षसामान्यभावेन घटादिप्रत्यक्षोत्पत्तिसंभवात् । आचार्यमते तु पदनिर्णीततसामग्रीप्रतिबंधकतावच्छेदकवह्निव्याप्यवत्तानिर्णयाभावनि
मन्निवेशस्य व्यभिचारवारणार्थं तत्प्रतिबध्यतावच्छेदककोटौ तादृशनिर्णयविशिष्टत्वस्य निवेशे तदुत्तरस्य निवेशो उपदर्शितापत्तिः प्रतिबध्यतावच्छेदक
कोटौ तथाविधनिर्णयवैशिष्ट्यस्य निवेशस्य घटादिप्रत्यक्षं प्रति तथाविधनिर्णयाभावनिवेशस्य वन्ह्यभावानुमितिसामग्र्याः प्रतिबंधकत्वे च

...मन्ये तदपि। एवं लघुत्वात् सामग्रीमध्ये तत्स्यानिवेशो आपत्तिवारणायाचार्यमते तादृशनिर्णयवैशिष्ट्यविशेष्यतया कारणत्वं कल्पनीयं। चिंतामणिकारमते तु धूमनिर्णयनिवेशे ... इत्यर्थः ...

नेतेनुसंहेतरकारणतांचविशिष्टवैशिष्ट्यविशेषणभावेविनिगमनाविरहेणसामग्रीप्रतिबंधकताबाहुल्यंप्रयुक्तगौरवस्यमीर्ध्याणरुरीरस्थितः समाधेयत्वा
दिति। केचित्तु। आचार्यमतेपिव्यभिचारवारणार्थंधूमपरामर्शव्यवहितोत्तरत्वस्यधूमपरामर्शजन्यतावच्छेदककोटौनिवेशस्यावश्यकत्वात्याप्रसि
तंधूमपरामर्शजन्यतावच्छेदककोटौव्यवहितोत्तरत्वनिवेशापेक्षयालाघवेन। तथाहि। आचार्यमतेपूर्वोपदर्शितपर्वतनिष्ठवह्निविशेष्यतानिरूपि
तवह्निनिष्ठविधेयतान्यूनानुमितिंप्रतिपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारतान्यूनालिंगनिर्णयत्वेनहेतुत्वंवक्तव्यं। तत्रचनिर्ण
यत्वंनपर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमाभावादिप्रकारताशून्यत्वेसतिवह्निव्याप्यधूमप्रकारकज्ञानत्वंतथासतिनीलपर्वतोधूमाभा
ववान्पर्वतोवह्निव्याप्यधूमवांश्चेतिसमूहालंबनादनुमित्यनुत्पादप्रसंगात्। नचपर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमाभावादिप्र
कारताशून्यत्वेसतितादृशधूमप्रकारतान्यूनालिंगज्ञानत्वमेवनिर्णयत्वंवाच्यं। तथासतिनीलपर्वतोवह्निव्याप्यधूमवानवेतिसंशयात्तथाविधपर्वतोव
ह्निमानितिलानुमित्यापत्तेरितिशुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमाभावादिप्रकारताशून्यत्वेसतिशुद्धपर्वतत्वावच्छिन्नविशेष्यतानि
रूपिततथाविधधूमप्रकारतान्यूनालिंगज्ञानत्वमेवतथाविधनिर्णयत्वंवक्तव्यं। तथाचवह्निव्याप्यधूमवान्नीलपर्वतइत्यादिपरामर्शादनाया
नीलोवह्न्यभाववानित्यादिवाधबुद्धिसत्त्वेवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमित्युत्पत्त्यातत्रशुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितधू
